# યિહૂદાઃ પત્રં

I યીશુખ્રીષ્ટસ્ય દાસો યાકૂબો ભ્રાતા યિહૂદાસ્તાતેનેશ્વરેણ
પવિત્રીકૃતાન્ યીશુખ્રીષ્ટેન રક્ષિતાંશ્ચાહૂતાન્ લોકાન્ પ્રતિ પત્રં લિખતિ।

II કૃપા શાન્તિઃ પ્રેમ ચ બાહુલ્યરૂપેણ યુષ્માસ્વધિતિષ્ઠતુ।

III હે પ્રિયાઃ, સાધારણપરિત્રાણમધિ યુષ્માન્ પ્રતિ લેખિતું મમ
બહુયત્ને જાતે પૂર્વ્વકાલે પવિત્રલોકેષુ સમર્પિતો યો ધર્મ્મસ્તદર્થં
યૂયં પ્રાણવ્યયેનાપિ સચેષ્ટા ભવતેતિ વિનયાર્થં યુષ્માન્ પ્રતિ
પત્રલેખનમાવશ્યકમ્ અમન્યે।

IV યસ્માદ્ એતદ્રૂપદણ્ડપ્રાપ્તયે પૂર્વ્વં લિખિતાઃ કેચિજ્જના
અસ્માન્ ઉપસૃપ્તવન્તઃ, તે ઽધાર્મ્મિકલોકા અસ્માકમ્ ઈશ્વરસ્યાનુગ્રહં
ધ્વજીકૃત્ય લમ્પટતામ્ આચરન્તિ, અદ્વિતીયો ઽધિપતિ ર્યો ઽસ્માકં પ્રભુ
ર્યીશુખ્રીષ્ટસ્તં નાઙ્ગીકુર્વ્વન્તિ।

V તસ્માદ્ યૂયં પુરા યદ્ અવગતાસ્તત્ પુન ર્યુષ્માન્ સ્મારયિતુમ્
ઇચ્છામિ, ફલતઃ પ્રભુરેકકૃત્વઃ સ્વપ્રજા મિસરદેશાદ્ ઉદધાર યત્ તતઃ
પરમ્ અવિશ્વાસિનો વ્યનાશયત્।

VI યે ચ સ્વર્ગદૂતાઃ સ્વીયકર્તૃત્વપદે ન સ્થિત્વા સ્વવાસસ્થાનં
પરિત્યક્તવન્તસ્તાન્ સ મહાદિનસ્ય વિચારાર્થમ્ અન્ધકારમયે ઽધઃસ્થાને
સદાસ્થાયિભિ ર્બન્ધનૈરબધ્નાત્।

VII અપરં સિદોમમ્ અમોરા તન્નિકટસ્થનગરાણિ ચૈતેષાં
નિવાસિનસ્તત્સમરૂપં વ્યભિચારં કૃતવન્તો વિષમમૈથુનસ્ય ચેષ્ટયા વિપથં
ગતવન્તશ્ચ તસ્માત્ તાન્યપિ દૃષ્ટાન્તસ્વરૂપાણિ ભૂત્વા સદાતનવહ્નિના
દણ્ડં ભુઞ્જતે।

VIII તથૈવેમે સ્વપ્નાચારિણોઽપિ સ્વશરીરાણિ કલઙ્કયન્તિ
રાજાધીનતાં ન સ્વીકુર્વ્વન્ત્યુચ્ચપદસ્થાન્ નિન્દન્તિ ચા

IX કિન્તુ પ્રધાનદિવ્યદૂતો મીખાયેલો યદા મૂસસો દેહે શયતાનેન
વિવદમાનઃ સમભાષત તદા તિસ્મન્ નિન્દારૂપં દણ્ડં સમર્પયિતું સાહસં
ન કૃત્વાકથયત્ પ્રભુસ્ત્વાં ભર્ત્સયતાં।
X કિન્ત્વિમે યન્ન બુધ્યન્તે તન્નિન્દન્તિ યચ્ચ નિર્બ્બોધપશવ
ઇવેન્દ્રિયૈરવગચ્છન્તિ તેન નશ્યન્તિ।
XI તાન્ ધિક્, તે કાબિલો માર્ગે ચરન્તિ પારિતોષિકસ્યાશાતો
બિલિયમો ભ્રાન્તિમનુધાવન્તિ કોરહસ્ય દુર્મ્મુખત્વેન વિનશ્યન્તિ ચ।
XII યુષ્માકં પ્રેમભોજ્યેષુ તે વિઘ્નજનકા ભવન્તિ, આત્મમ્ભરયશ્ચ
ભૂત્વા નિર્લજ્જયા યુષ્માભિઃ સાર્દ્ધં ભુઞ્જતે। તે વાયુભિશ્ચાલિતા
નિસ્તોયમેઘા હેમન્તકાલિકા નિષ્ફલા દ્વિ ર્મૃતા ઉન્મૂલિતા વૃક્ષાઃ,
XIII સ્વકીયલજ્જાફેણોદ્વમકાઃ પ્રચણ્ડાઃ સામુદ્રતરઙ્ગાઃ સદાકાલં
યાવત્ ઘોરતિમિરભાગીનિ ભ્રમણકારીણિ નક્ષત્રાણિ ચ ભવન્તિ।
XIV આદમતઃ સપ્તમઃ પુરુષો યો હનોકઃ સ તાનુદ્દિશ્ય
ભવિષ્યદ્વાક્યમિદં કથિતવાન્, યથા, પશ્ય સ્વકીયપુણ્યાનામ્ અયુતૈ
ર્વેષ્ટિતઃ પ્રભુઃ।
XV સર્વ્વાન્ પ્રતિ વિચારાજ્ઞાસાધનાયાગમિષ્યતિ। તદા ચાધાર્મ્મિકાઃ
સર્વ્વે જાતા યૈરપરાધિનઃ। વિધર્મ્મકર્મ્મણાં તેષાં સર્વ્વેષામેવ કારણાત્।
તથા તદ્વૈપરીત્યેનાપ્યધર્મ્માચારિપાપિનાં। ઉક્તકઠોરવાક્યાનાં
સર્વ્વેષામપિ કારણાત્। પરમેશેન દોષિત્વં તેષાં પ્રકાશયિષ્યતે॥
XVI તે વાક્કલહકારિણઃ સ્વભાગ્યનિન્દકાઃ સ્વેચ્છાચારિણો
દર્પવાદિમુખવિશિષ્ટા લાભાર્થં મનુષ્યસ્તાવકાશ્ચ સન્તિ।
XVII કિન્તુ હે પ્રિયતમાઃ, અસ્માકં પ્રભો ર્યીશુખ્રીષ્ટસ્ય પ્રેરિતૈ ર્યદ્
વાક્યં પૂર્વ્વં યુષ્મભ્યં કથિતં તત્ સ્મરત,
XVIII ફલતઃ શેષસમયે સ્વેચ્છાતો ઽધર્મ્માચારિણો નિન્દકા
ઉપસ્થાસ્યન્તીતિ।
XIX એતે લોકાઃ સ્વાન્ પૃથક્ કુર્વ્વન્તઃ સાંસારિકા આત્મહીનાશ્ચ
સન્તિ।
XX કિન્તુ હે પ્રિયતમાઃ, યૂયં સ્વેષામ્ અતિપવિત્રવિશ્વાસે નિચીયમાનાઃ
પવિત્રેણાત્મના પ્રાર્થનાં કુર્વ્વન્ત

XXI ઈશ્વરસ્ય પ્રેમ્ના સ્વાન્ રક્ષત, અનન્તજીવનાય ચાસ્માકં પ્રભો
યીશુખ્રીષ્ટસ્ય કૃપાં પ્રતીક્ષધ્વં।
XXII અપરં યૂયં વિવિચ્ય કાંશ્ચિદ્ અનુકમ્પધ્વં
XXIII કાંશ્ચિદ્ અગ્નિત ઉદ્ધૃત્ય ભયં પ્રદશ્ર્ય રક્ષત, શારીરિકભાવેન
કલઙ્કિતં વસ્ત્રમપિ ઋતીયધ્વં।
XXIV અપરઞ્ચ યુષ્માન્ સ્ખલનાદ્ રક્ષિતુમ્ ઉલ્લાસેન સ્વીયતેજસઃ
સાક્ષાત્ નિર્દ્દોષાન્ સ્થાપયિતુઞ્ચ સમર્થો
XXV યો ઽસ્માકમ્ અદ્વિતીયસ્ત્રાણકર્ત્તા સર્વ્વજ્ઞ ઈશ્વરસ્તસ્ય ગૌરવં
મહિમા પરાક્રમઃ કર્તૃત્વઞ્ચેદાનીમ્ અનન્તકાલં યાવદ્ ભૂયાત્। આમેન્।

# Sanskrit Bible (NT) in Gujarati Script
## New Testament in Sanskrit Language; printed in Gujarati Script

copyright © 2018 SanskritBible.in

Language: Sanskrit

Contributor: SanskritBible.in

Thank you for your interest in Sanskrit Bible.
Sanskrit Bible (NT) is freely available in 22 different scripts of your choice. This edition is in Gujarati script and is based on the Sanskrit translation of the Holy Bible published by Calcutta Baptist Missionaries in 1851. Please visit SanskritBible.in to learn more about Sanskrit Bible and to download various free Christian literature.

This translation is made available to you under the terms of the Creative Commons Attribution Share-Alike license 4.0.
You have permission to share and redistribute this Bible translation in any format and to make reasonable revisions and adaptations of this translation, provided that:

- You include the above copyright and source information.
- If you make any changes to the text, you must indicate that you did so in a way that makes it clear that the original licensor is not necessarily endorsing your changes.
- If you redistribute this text, you must distribute your contributions under the same license as the original.

Pictures included with Scriptures and other documents on this site are licensed just for use with those Scriptures and documents. For other uses, please contact the respective copyright owners.
Note that in addition to the rules above, revising and adapting God's Word involves a great responsibility to be true to God's Word. See Revelation 22:18-19.

2020-01-01

---

PDF generated using Haiola and XeLaTeX on 22 Feb 2024 from source files dated 29 Jan 2022
e1290797-4477-53f0-873d-c9153a72fd01